# दिल्ली-पब्लिक स्कूल, भिलाई नगरम्
## आदर्श प्रश्नपत्रम् संस्कृतम्
### कक्षा - दशमी

### 'क' भागः

**अपठितावबोधनम्** **(10 अङ्काः)**

| | | |
|---|---|---|
| 1. | *** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** | 10 |
| | आदिकालादेव अस्माकं देशः भारतं जगति प्रसिद्धम् अस्ति। भारतस्य प्रतिष्ठे द्वे- संस्कृतं संस्कृतिस्तथा। संस्कृतभाषा अस्य प्राचीनज्ञानविज्ञानयोः पोषिका महत्संस्कृतेः च संवाहिका अस्ति। कथ्यते अपि भारतीया संस्कृतिः संस्कृते एव निहिता वर्तते। विविधतायाम् एकता एव अस्माकं संस्कृतेः प्रधानम् अभिधानम्। यथा अत्र जनानां विविधाः सम्प्रदायाः, विविधाः भाषाः, पूजापद्धतयः वेशभूषाः च सन्ति परम् अनेकतायाम् अपि एकतायाः मधुरा धारा प्रवहति। न केवलम् एतावदेव अपितु अस्य देशस्य प्रकृतिः अपि विविधतां धारयति। अस्मिन् देशे सर्वे ऋतवः क्रमेण आगच्छन्ति। ते च वसन्तः ग्रीष्मः वर्षा शरद् हेमन्तः शिशिरः इति। अत्र भिन्नभिन्न-भाषाभाषिणः मतावलम्बिनः सर्वे भारतीयाः एकं राष्ट्रध्वजं नमन्ति एकं राष्ट्रगानं च गायन्ति। एते राष्ट्रिय-उत्सवान् सामाजिक-उत्सवान् च मिलित्वा आयोजयन्ति। भारतस्य वैशिष्ट्यमेतद् सर्वदा निरन्तरं च भवेद् इति सर्वैः भारतीयैः काम्यते। भारतं पुनः विश्वगुरुं कर्तुं सर्वे भारतीयाः प्रयतन्ते। | |
| | **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** | 1×2=2 |
| | (i) प्राचीनज्ञानविज्ञानयोः पोषिका का भाषा ? | |
| | (ii) अस्माकं देशे के क्रमेण आगच्छन्ति ? | |
| | (iii) आदिकालादेव कः देशः जगति प्रसिद्धम् अस्ति ? | |
| | **आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)** | 2×2=4 |
| | (i) भारतीयाः किं कर्तुं प्रयतन्ते? | |
| | (ii) अस्माकं संस्कृतेः प्रधानम् अभिधानं किम् ? | |
| | (iii) सर्वैः भारतीयैः किं काम्यते ? | |
| | **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** | 1 |
| | **ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** | 1×3=3 |
| | (i) 'धारयति' इति क्रियापदस्य कर्तृपदं किं भवेत्? | |
| | (क) विविधताम् (ख) एतावदेव | |
| | (ग) केवलम् (घ) प्रकृतिः | |
| | (ii) 'प्रधानम्' इति विशेषणपदस्य विशेष्यपदं किम्? | |
| | (क) संस्कृतेः (ख) अभिधानम् | |
| | (ग) विविधतायाम् (घ) एकता | |

(iii) 'अस्माकं देशः भारतं जगति प्रसिद्धम् अस्ति। ' अत्र किं क्रियापदम्?

(क) भारतम् (ख) जगति

(ग) अस्ति (घ) देशः

(iv) 'विविधतायाम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(क) अनेकतायाम् (ख) एकतायाः

(ग) भारतीयाः (घ) सम्प्रदायाः

## 'ख' भागः

## रचनात्मकं कार्यम् (15 अङ्काः)

2. * भवतः अनुजः तनिष्कः पठनं त्यक्त्वा चलदूरभाषयन्त्रेण क्रीडने सर्वदा व्यस्तः भवति। तं पठनार्थं प्रेरयन् लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा पुनः लिखत – ½x10=5

परीक्षाभवनात्
तिथिः ......................

प्रिय (i) ...................... !
शुभाशीषः।

ह्यः एव मातुः (ii) ............ प्राप्तम्। माता अद्यत्वे पठने तव (iii)............... दृष्ट्वा चिन्तिता अस्ति। त्वं पठनं त्यक्त्वा चलदूरभाषयन्त्रेण (iv) .................. रतः भवसि। अर्धवार्षिक-परीक्षायाम् अपि तव (v) ......... न्यूनाः आगताः। एतद् तु न (vi) ...........। यद्यपि क्रीडनम् अपि (vii) ................ आवश्यकं परं तत् शारीरिकं भवेत्। क्रीडनेन सह पठनम् अपि अत्यावश्यकम्। ये चलदूरभाषयन्त्रेण अत्यधिकं समयं वृथा यापयन्ति ते न केवलं (viii) ........ अस्वस्थाः भवन्ति अपितु जीवने असफलाः अपि। अतः मम (ix) .......... अस्ति यत् समयस्य महत्त्वम् अवगत्य (x) .................. ध्यानेन पठ। मातृपितृचरणयोः मे प्रणामाः कथनीयाः।

तव अग्रजः,
मोहितः

**मञ्जूषा**

| |
|---|
| त्वम्, मानसिकरूपेण, पत्रम्, स्वास्थ्याय, अरुचिम्, तनिष्क, अङ्काः, क्रीडने, उचितम्,परामर्शः। |

| | | |
|---|---|---|
| 3. | * प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –<br><br>**मञ्जूषा –**<br>यज्ञपात्रम्, अग्निः, बालकाः, मन्त्रोच्चारणम्, विद्यालयः, श्रद्धया, आसनानि, तिष्ठन्ति, प्रज्वलति, भवनम्, पादपाः, यज्ञं कुर्वन्ति।<br><br>अथवा<br>* निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -<br>"दिल्ली-विश्वपुस्तकमेलकम्"<br>**मञ्जूषा**<br>प्रतिवर्षम् , प्रगतिमैदान इति स्थले, फरबरी-मार्चमासे, विविधानि पुस्तकानि, आपणिकाः, आयोज्यते, जनसम्मर्दः, विभिन्नाः प्रकोष्ठाः, पुस्तकप्रेमिणः, साहित्यिक-गोष्ठ्यः, भवन्ति, सांस्कृतिककार्यक्रमाः, अल्पमूल्येन। | 1×5=5<br><br>1×5=5 |
| 4. | * अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत-<br>एकः टोपिकाविक्रेता आसीत्। सः एकदा (i) ------------- विक्रेतुं ग्रामान्तरं गच्छन् आसीत्। (ii) ------------ सः श्रान्तः अभवत्, अतः(iii) ----------- अधः स्थित्वा शयनम् अकरोत्। तत्र बहवः वानराः आसन्। (iv) ----------- तस्य टोपिकाः स्वीकृत्य वृक्षस्य उपरि अतिष्ठन्। (v) ---------- टोपिकाविक्रेता जागृतः अभवत् तदा सः टोपिकाः न दृष्ट्वा बहु (vi) ---------- अभवत्। सः एकम् (vii) ---------- अकरोत्। सः वानराणां पुरतः स्थित्वा स्वस्य टोपिकां दूरम् | ½×10=5 |

अक्षिपत्। (viii) ------------ वानराः अपि स्वस्य स्वस्य टोपिकाः अधः (ix) ----------।
चतुरः टोपिकाविक्रेता टोपिकाः एकत्रीकृत्य प्रसन्नः भूत्वा ततः (x) ------। अतः कथ्यते- **बलात् बुद्धिः श्रेष्ठा।**

**मञ्जूषा**

| |
|---|
| अगच्छत्, अनुकरणशीलाः, वृक्षस्य, दुःखी, यदा, उपायम्, मार्गे, अक्षिपन्, टोपिकाः, ते |

**अथवा**

*** रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-** 1×5=5

**जनकः** - पुत्र केशव! (i) ------------------------------------ ?

**पुत्रः** - हे जनक! अहं 'गीतां' पठामि।

**जनकः**- शोभनम् , 'गीता' इति बहु उत्तमः ग्रन्थः अस्ति। 'गीता' महाभारतस्य भागः अस्ति यस्मिन् सप्तशत श्लोकाः सन्ति।

**पुत्रः** - आम्, (ii) ------------------------------------------।

**जनकः** - सत्यम्। किं त्वं जानासि यत् महाभारतस्य लेखकः कः अस्ति ?

**पुत्रः** - आम् , जनक! (iii) ------------------------------------------।

**जनकः** - उत्तमम्, संस्कृतस्य प्रसिद्धौ ग्रन्थौ कौ ?

**पुत्रः** - अहं मन्ये, (iv) --------------------------------------।

**जनकः** - सत्यम्, त्वं बहु जानासि। अहं बहु प्रसन्नः अस्मि।

**पुत्रः** - धन्यवादः पितः! (v) --------------------------------------।

**मञ्जूषा**

- अस्य लेखकः महर्षिः वेदव्यासः अस्ति।
- त्वम् एतावद्-ध्यानेन किं पठसि?
- अहं पठामि अतः जानामि।
- एतौ प्रसिद्धौ ग्रन्थौ 'रामायणम्' 'महाभारतम्' च स्तः।
- एतेषु श्लोकेषु श्रीकृष्णस्य ज्ञानवर्धकाः उपदेशाः सन्ति।

| | | |
|---|---|---|
| | 'ग' भागः<br>अनुप्रयुक्तव्याकरणम् (25 अङ्काः) | |
| 5. | * अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्)<br>(i) जीवाः **सर्वेऽत्र** मोदन्ताम्।<br>(ii) प्रजहि **हि+एनं** ज्ञानविज्ञाननाशनम्।<br>(iii) कश्चिद् **उद्दण्डः** बालकः उवाच।<br>(iv) **क्रोध एषः** रजोगुणसमुद्भवः।<br>(v) कथमिव पश्येयं **चक्षुः+हीनः**। | 1×4=4 |
| | | |
| 6. | अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)<br>(i) हिमाद्रितुङ्गश्रृङ्गैः सुशोभिता **सूर्योदयभूमिः** इयम्।<br>(क) सूर्यस्य भूमिः (ख) सूर्योदयस्य भूमिः<br>(ग) सूर्योदयेन भूमिः (घ) सूर्योदयः भूमिः<br>(ii) वानराणां **यूथपः** सर्वान् वानरान् अवदत्।<br>(क) यूथस्य पतिः (ख) यूथं पिबति इति<br>(ग) यूथं पाति इति (घ) यूथस्य पः<br>(iii) सर्वेषामपि महत्त्वं विद्यते **समयम् अनतिक्रम्य**।<br>(क) समयम् यथा (ख) यथासमयम्<br>(ग) समयानुसारम् (घ) यथासमयः<br>(iv) सः **सकरुणम्** उच्चैः अक्रन्दत्।<br>(क) करुणया सह (ख) सह करुणम्<br>(ग) करुणा सह (घ) सा करुणा<br>(v) ततः प्रविशतः **व्यासनारदौ**।<br>(क) व्यासः नारदः (ख) व्यासौ नारदौ च<br>(ग) व्यासः नारदौ च (घ) व्यासः च नारदः च | 1×4=4 |
| | | |

| | | |
|---|---|---|
| 7. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) **<u>विपुला</u>** च अत्र वनसम्पदा।<br>(क) विपुलः + टाप् (ख) विपुल + टाप्<br>(ग) विपुल + ङीप् (घ) विपुल + इक्<br>(ii) विद्वांस एव **<u>चक्षुष्मन्तः</u>** प्रकीर्तिताः।<br>(क) चक्षुस्+मत् (ख) चक्षुः+मतुप्<br>(ग) चक्षुर्+मतुप् (घ) चक्षुस्+मतुप्<br>(iii) ईटा हि यस्यास्ति **<u>पुर+ङीप्</u>** प्रधाना।<br>(क) पुरा (ख) पुरः<br>(ग) पुरी (घ) पूर्णा<br>(iv) अस्मिन् अवसरे **<u>समाज+ठक्</u>** कार्यं क्रियते।<br>(क) सामाजिकम् (ख) सामाजिकः<br>(ग) सामाजिकी (घ) सामाजिका<br>(v) **<u>अवक्रता</u>** यथा चित्ते तथा वाचि भवेत्।<br>(क) अवक्र+टाप् (ख) अवक्र+तल्<br>(ग) अवक्र+ङीप् (घ) अवक्र+त्व | 1×4=4 |
| | | |
| 8. | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत – (केवलं प्रश्नत्रयम्)**<br>आदित्यः – वैभव! इदानीं त्वया किं क्रियते ?<br>वैभवः – आदित्य! अधुना तु मया (i) ----------- क्रियते। का वार्ता ?<br>आदित्यः – नास्ति विशेषः। (ii) ----------- क्रीडितुं बहिः गम्यते, त्वमपि आगच्छ।<br>वैभवः – न। श्वः मम परीक्षा भविष्यति अतः अद्य (iii) ----------- सम्पूर्णदिने पठामि।<br>आदित्यः –अस्तु, किन्तु त्वं किं पठसि ?<br>वैभवः – गणितविषयस्य परीक्षा भविष्यति अतः मया गणितविषयः(iv) ----------।<br>**मञ्जूषा**<br>असमाभिः, पठ्यते, अध्ययनम्, अहम् | 1×3=3 |

| | | |
|---|---|---|
| 9. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नत्रयम्)**<br>(i) सौम्या प्रातः --------- 4:00 वादने उत्तिष्ठति।<br>(ii) ततः सा -----------05:15 वादने योगाभ्यासं करोति।<br>(iii) तदनन्तरं सा ------------- 7:45 वादने विद्यालयं गच्छति।<br>(iv) ----------- 2:30 वादने आगत्य सा पुनः भोजनं करोति। | 1×3=3 |
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) प्राणत्राणाय अश्वाः ----------- अधावन्।<br>(ii) यूयं सर्वे -------- मम प्रियाः।<br>(iii) अभ्यासेन तु कौन्तेय वैराग्येण ----------- गृह्यते।<br>(iv) अर्जुन! त्वम् ------- मुञ्च ब्रह्मास्त्रम् एतत् निवारयितुम्।<br>(v) ---------- विषादं त्यक्त्वा उद्यमः क्रियताम्।<br>**मञ्जूषा**<br>इदानीम्, अपि, इतस्ततः, एव, च | 1×4=4 |
| 11. | *** अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत – (केवलं प्रश्नत्रयम्)**<br>(i) प्रबुद्धौ <u>**ते**</u> दम्पती आश्चर्येण अतिष्ठताम्।<br>(क) सा (ख) तौ<br>(ग) ताः (घ) तानि<br>(ii) कुमार्गम् आश्रितस्य मम <u>**कीदृशः**</u> इयं क्लेशपरम्परा।<br>(क) कीदृशम् (ख) कीदृश्यः<br>(ग) कीदृशाः (घ) कीदृशी<br>(iii) त्वं नर्तनात् अन्यत् किम् अपरं **जानाति**?<br>(क) जानन्ति (ख) जानन्ति<br>(ग) जानामि (घ) जानासि<br>(iv) राजा वैद्यान् आहूय <u>**पृच्छतु।**</u><br>(क) अपृच्छत् (ख) प्रक्ष्यन्ति<br>(ग) अपृच्छः (घ) अपृच्छन् | 1×3=3 |

## 'घ' भागः

## पठितावबोधनम् (30 अङ्काः)

| | | |
|---|---|---|
| 12. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>तस्य वचनं श्रुत्वा अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्- 'भो! किमिदम् उच्यते ? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।' तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान्- रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।<br>अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः। | 5 |
| | **अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) मदोद्धताः के आसन् ?<br>(ii) कः सगद्गद्म् उक्तवान् ?<br>(iii) वह्निज्वालाः कुत्र समुत्थिताः ? | ½×2=1 |
| | **आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) साश्रुनयनो यूथपतिः सगद्गदं किम् उक्तवान्?<br>(ii) मेषः किमर्थं भूमौ लुठति ?<br>(iii) कीदृशः मेषः अश्वशालां प्रविशति ? | 1×2=2 |
| | *** इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) 'अवदन्' क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?<br>(ii) 'यूथपतिः' इति पदस्य किं विशेषणपदं प्रयुक्तम् ?<br>(iii) 'भूमौ' इत्यस्य किं पर्यायपदं प्रयुक्तम् ? | 1×2=2 |
| | | |
| 13. | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।<br>व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥<br>पापिनाञ्च सदा दुःखं सुखं वै पुण्यकर्मणाम्।<br>एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत्॥ | 5 |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) सरस्वत्याः कोशः कीदृशः मन्यते ?<br>(ii) अयं कोशः कथं क्षयमायाति ?<br>(iii) पुण्यकर्मणां फलं किम् ? | ½×2=1 |

| | | |
|---|---|---|
| | आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) केषां सदा दुःखं भवति ?<br>(ii) भारत्याः कोशः कथं वर्धते ?<br>(iii) मनुष्यः कां समाचरेत् ?<br>* इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)<br>(i) "अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।" अत्र वाक्ये क्रियापदं किम् ?<br>(ii) 'दुःखम्' इत्यस्य किं विपर्ययपदं प्रयुक्तम्?<br>(iii) 'अपूर्वः' इत्यस्य विशेष्यपदं चित्वा लिखत। | 1×2=2<br><br><br><br>1×2=2 |
| | | |
| 14. | अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –<br>श्रीकृष्णः - भो धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।<br>युधिष्ठिरः - भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।<br>श्रीकृष्णः - न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।<br>युधिष्ठिरः - अप्येवम् ! आचार्येण कीदृशः अनर्थः कृतः। किं चपलबालकेभ्यः एतादृश-भीषणानाम् अस्त्राणां प्रदानम् उचितम् ?<br>श्रीकृष्णः - शृणु तावत्, आचार्येण तु प्रियशिष्याय अर्जुनाय प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता। किन्तु पुत्रप्रेमपराधीनेन तेन अश्वत्थामा अपि तच्छिक्षया वञ्चितः न कृतः।<br>अर्जुनः - अपरं च अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्यः पुत्रं सावधानम् अकरोत्।<br>अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) आचार्यः द्रोणः कं सावधानम् अकरोत् ?<br>(ii) भीमसेनः कं हन्तुम् अभिधावति ?<br>(iii) द्रौणेः प्रकृतिः कीदृशी आसीत् ?<br>आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कदा सर्वा पृथ्वी दग्धा स्यात् ?<br>(ii) द्रोणेन अर्जुनाय कथं ब्रह्मास्त्रशिक्षा प्रदत्ता ?<br>(iii) अश्वत्थामा कुतः ब्रह्मशिरो नाम अस्त्रं प्राप्तवान् ?<br>* इ. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)<br>(i) 'पर्याप्तम्' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?<br>(ii) 'जानाति' इति क्रियापदस्य कर्तृपदं किम् अत्र प्रयुक्तम् ?<br>(iii) 'दग्धा' इत्यस्य विशेष्यपदं चित्वा लिखत। | 5<br><br><br><br><br><br><br><br><br><br>½×2=1<br><br><br><br>1×2=2<br><br><br><br>1×2=2 |

| | | |
|---|---|---|
| 15. | * रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः)<br>(i) मम पिच्छानाम् **अपूर्वं** सौन्दर्यम्।<br>(ii) अयं पुरुषः **पापं** चरति।<br>(iii) राजा **शक्राय** चक्षुः समर्पितवान्।<br>(iv) एतद् **मनुष्येषु** न प्रयोक्तव्यम्।<br>(v) मधुरभाषिणी **वाणी** पुरुषं प्रह्लादयति।<br>(vi) वयं **स्थलानि** द्रष्टुम् उत्सुकाः स्मः। | 1×5=5 |
| 16. | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –**<br>पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।<br>पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥<br>**अन्वयः** - पिता पुत्राय (i) ----------- महत् (ii) -------------- यच्छति। अस्य पिता किं तपः (iii) ---------- इति (iv) ----------- तत्कृतज्ञता (मन्यते)।<br>**मञ्जूषा**<br>उक्तिः, विद्याधनम्, तेपे, बाल्ये<br>**अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**<br>असंशयं महाबाहो ! मनो दुर्निग्रहं चलम्।<br>अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते ॥<br>**भावार्थः**- हे महाबाहो! अत्र संशयः नास्ति यत् एतत् (i) ------------ अतीव चञ्चलम् अस्ति। इदं (ii) --------- नियन्त्रितं भवति परन्तु यदि वयं पुनः पुनः (iii) -------------- कुर्मः, विरक्ताः च भवामः तदा निश्चयेन एतत् वशीकर्तुं (iv) ----------------।<br>**मञ्जूषा**<br>बहुकष्टेन, अभ्यासम्, शक्नुमः, मनः | ½×4=2<br><br><br><br><br><br><br>½×4=2 |
| 17. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>**(केवलं प्रश्नचतुष्टयम्)**<br>(i) यः इच्छत्यात्मनः **श्रेयः**।<br>(क) अर्घ्यम् (ख) गृहम्<br>(ग) कल्याणम् (घ) अमूल्यम् | 1×4=4 |

| | | |
|---|---|---|
| | (ii) **<u>सर्वदा</u>** शारदा सदैव अस्माकं मुखे निवसेत्।<br>(क) सर्वदायिनी (ख) सर्वम्<br>(ग) सर्वहितम् (घ) वीणासहिता<br>(iii) अहर्निशं **<u>महानसं</u>** प्रविश्य यत् पश्यति तद् भक्षयति स्म।<br>(क) महानाशम् (ख) भोजनशालाम्<br>(ग) महान्तम् (घ) महती<br>(iv) अस्माकं क्षेत्रे सुवर्णपूरितः **<u>कलशः</u>** विद्यते।<br>(क) कलेशः (ख) काकः<br>(ग) सर्वत्र (घ) घटः<br>(v) तस्याहं **<u>निग्रहं</u>** मन्ये वायोरिव सुदुष्करम्।<br>(क) न्यासः (ख) वशीकरणम्<br>(ग) नेत्रम् (घ) प्रसन्नः | |
| | | |
| 18. | **अधोलिखित-कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत –**<br>एकदा भगवान् बोधिसत्त्वः (i) ------------ राजा अभवत्। सः महान् दानी, विनयशीलः, वृद्धोपसेवी च (ii) -------------। तस्य दानशीलताम् श्रुत्वा (iii) ------------- देशेभ्योऽपि जनाः तस्य देशम् आयान्ति स्म। एकदा शक्रः अपि तस्य (iv) ----------------- परीक्षितुम् आगच्छत्। सः नेत्रहीनयाचक-रूपेण आगत्य तं राजानम् एकं (v) ---------------- अयाचत। राजा तस्मै चक्षुर्द्वयमेव प्रायच्छत्। प्रसन्नः (vi) --------------- कतिपयेभ्यः दिनेभ्यः पश्चात् पुनः राज्ञः पुरतः उपस्थितः अभवत्। सः राज्ञः त्यागवृत्तिं प्रशंसन् नेत्रद्वयमपि प्रत्यस्थापयत्। अपि च शतयोजनपर्यन्तं (vii) ------------ पारं द्रष्टुं समर्थः भव इति तस्मै वरम् अयच्छत्। उच्यते अपि- नास्ति त्यागसमं (viii) -----------------।<br>**मञ्जूषा**<br>आसीत्, शिवीनाम्, सुखम्, शैलानाम्<br>अन्येभ्यः, दानशीलताम्, शक्रः, नेत्रम्। | ½x8=4 |

-------------0000--------------

दिल्ली – पब्लिक – स्कूल, भिलाईनगरम्

आदर्श-प्रश्नपत्रम् 2024-25 समय: - होरात्रयम्

कक्षा- दशमी संस्कृतम् (119) पूर्णाङ्का: - 80

---

(1) अस्मिन् प्रश्नपत्रे चत्वार: भागा: सन्ति।

**'क' भाग: - अपठितावबोधनम् - 10 अङ्का:** **'ख' भाग: - रचनात्मककार्यम् - 15 अङ्का:**

**'ग' भाग: - अनुप्रयुक्तव्याकरणम् - 25 अङ्का:** **'घ' भाग: - पठितावबोधनम् - 30 अङ्का:**

(2) कृपया सम्यक् परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्ना: सन्ति।

(3) उत्तरलेखनात् पूर्वं प्रश्नक्रमाङ्क: अवश्यं लेखनीय:।

(4) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(5) प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया:।

---

## 'क' भाग: - अपठितावबोधनम् 10 अङ्का:

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानानाम् उत्तराणि लिखत -**

अद्यत्वे यत्र तत्र सर्वत्र वयं पश्यामः यत् उष्णतायाः प्रभावः दिनानुदिनं वर्धते। जनसङ्ख्यावृद्धेः कारणात् भवनानां निर्माणस्य आवश्यकता वृद्धिम् आप्नोति। एतस्मात् कारणात् वृक्षाः कर्त्यन्ते, वनानि क्षेत्राणि चाऽपि विनाश्यन्ते, अनेन पर्यावरणे असन्तुलनात् वैश्विकी उष्णता वर्धते। जीवाश्म-इन्धनस्य ज्वालनेन विषाक्तवायूनाम् उत्सर्जने वृद्धिर्जायते यतः सौरविकिरणं भूमेः वातावरणे निबद्धम् इव तिष्ठति, तापमानं च निरन्तरं वर्धमानम् एव अस्ति। एतादृश्याः स्थितेः निराकरणाय अनियन्त्रितम् औद्योगिकीकरणं निवारणीयम्। एतदेव वस्तुतः सम्पूर्णविश्वस्य कृते समस्याम् उत्पादयति। अतः सर्वैः मिलित्वा एव स्थितेः संशोधनाय प्रयासः करणीयः। एतदर्थम् सामान्यविद्युदपेक्षया पवनोर्जां सौरोर्जां प्रति च ध्यानं दातव्यम्। वृक्षकर्तनम् अवरुध्य अधिकाधिकं वृक्षारोपणं कृत्वा वनसंरक्षणं प्रत्यपि ध्यानं दातव्यम्।

**(I) एकपदेन उत्तरत -** ( केवलं प्रश्नद्वयम् ) (1x2=2)

i) कस्याः प्रभावः दिनानुदिनं वर्धते ? ii) जनसङ्ख्यावृद्धेः कारणात् केषां निर्माणस्य आवश्यकता वृद्धिमाप्नोति ?

iii) वैश्विकी का वर्धते ?

**(II) पूर्णवाक्येन उत्तरत -** ( केवलं प्रश्नद्वयम् ) (2×2=4)

i) कस्मात् कारणात् वृक्षाः कर्त्यन्ते ? ii) केन विषाक्तवायूनाम् उत्सर्जने वृद्धिर्जायते ?

iii) किं कृत्वा वनसंरक्षणं प्रति ध्यानं दातव्यम् ?

**(III) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत -** (1x1=1)

**(IV) भाषिककार्यम् -** ( केवलं प्रश्नत्रयम् ) (1×3=3)

i) 'शीतलता' अस्य विपर्ययपदं गद्यांशात् चित्वा लिखत। (क) वृक्षा: (ख) उष्णता (ग) आवश्यकता (घ) सौरोर्जा

ii) "पादपा:" अस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ? (क) पवनोर्जा (ख) वृक्षा: (ग) भूमे: (घ) तापमानम्

iii) " वैश्विकी उष्णता " अत्र विशेष्यपदं किम् ?

iv) अनुच्छेदे ' पश्याम:' इति क्रियापदस्य कर्तृपदं किम् अस्ति ? (क) वयं (ख) सर्वै: (ग) वृक्षा: (घ) वनानि

## 'ख' भाग: रचनात्मककार्यम् 15 अङ्का:

**2. भवतः अनुजः गोपालः पठनं त्यक्त्वा प्रायः खेलने संलग्नः भवति। तं पठनार्थं प्रेरयितुं लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा सम्पूर्णं पत्रं पुनः लिखत।** (½ x10 = 5)

दिनाङ्कः------------

(i) ------------

प्रिय गोपाल ! (ii) ------------।

ह्यः एव मात्रा लिखितं (iii) ------------ प्राप्तम्। पत्रं (iv) ------------ ज्ञातं यत् अद्यत्वे भवान् पठनं त्यक्त्वा (v) ------------ रतः भवति, एतद् तु न उचितम्। तव (vi) ------------ पठने न अस्ति अस्मात् कारणात् एव गत-परीक्षायां भवतः (vii) ------------ न्यूनाः आसन्। यद्यपि खेलनम् अपि जीवनाय आवश्यकम् परं तव (viii) ------------अपि तथा एव अनिवार्यम्। ये कालं व्यर्थं नयन्ति ते कदापि सफलतां न प्राप्नुवन्ति। मन्ये मम कथनं मनसि धृत्वा पठने एव ध्यानं दास्यसि। (ix) ------------ मे प्रणामाः।

भवतः अग्रजः

(x) ------------

**मञ्जूषा -** | रामगोपालः, खेलने, पठित्वा, रुचिः, पठनम्, पत्रं, अङ्काः, मातापितृभ्यां, छात्रावासतः, शुभाशिषः |

3. **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत -** ( 1x 5 =5)



**मञ्जूषा -**

वर्षायाः, मयूरः, आकाशे, जलगर्तस्य, बालिके, दोलाभिः, नृत्यति, बालकः, श्रावणमासस्य, वृक्षाः, हरितिमा, मण्डूकः, हसन्ति, इन्द्रधनुषः, समीपे, अनुभवन्ति

**अथवा**

**'स्वच्छता' इति विषयम् अधिकृत्य मञ्जूषापदानां सहायतया पञ्चवाक्येषु एकम् अनुच्छेदं संस्कृतेन लिखत –**

यथाशक्ति, प्रधानमन्त्री, जीवने, स्वच्छता-अभियानं, स्वगृहं, विद्यालये, आवश्यकी, प्रयतन्ते, छात्राः, जागरुकाः, अस्ति, अस्माकम्

4. **अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत -** (½ x10 = 5)

**मञ्जूषा -** अगच्छत्, अनुकरणशीलाः, वृक्षस्य, दुःखी, यदा, उपायम्, मार्गे, अक्षिपन्, क्रीडनकानि, ते

एकः क्रीडनकविक्रेता आसीत्। सः एकदा (i) ........ विक्रेतुं ग्रामान्तरं गच्छन् आसीत्। (ii) ......... सः श्रान्तः अभवत्, अतः (iii) ...... अधः स्थित्वा शयनम् अकरोत्। (v) ......... क्रीडनकविक्रेता जागृतः अभवत् तदा सः क्रीडनकानि न दृष्ट्वा बहु (vi) ......... अभवत्, तत्र बहवः वानराः आसन्। (iv) ........ तस्य क्रीडनकानि स्वीकृत्य वृक्षस्य उपरि अतिष्ठन्। सः एकम् (vii) ....... अकरोत्। सः वानराणां पुरतः स्थित्वा एकं क्रीडनकं दूरम् अक्षिपत्। (viii) ...... वानराः अपि स्व- स्वक्रीडनकानि अधः (ix) .......। चतुरः क्रीडनकविक्रेता क्रीडनकानि एकत्रीकृत्य प्रसन्नः भूत्वा ततः (x) ------। अतः कथ्यते - बलात् बुद्धिः श्रेष्ठा।

**अथवा**

**रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -** ( 1x 5 =5)

मञ्जूषा - पाण्डावानाम्, अर्जुनस्य, रामस्य, भ्राता, पिता

पुत्री – अम्ब ! अभिमन्युः कः आसीत् ?
अम्बा - अभिमन्युः ------------------- पुत्रः आसीत्।
पुत्री - भीष्मः कः आसीत् ?
अम्बा - भीष्मः कौरवानां ------------------- च पितामहः आसीत्।
पुत्री - पितामहः कः भवति ?
अम्बा - पितुः ------------------- पितामहः भवति।
पुत्री – अम्ब ! किं श्रीआर्यवीरः तव भ्राता ?
अम्बा - आम्, मम ------------------- तव मातुलः।
पुत्री - लवकुशौ रामस्य कौ आस्ताम् ?
अम्बा - लवकुशौ ------------------- पुत्रौ आस्ताम्।
पुत्री - अस्तु, अम्ब ! धन्यवादः।

## 'ग' भागः अनुप्रयुक्तव्याकरणम् — 25 अङ्काः

5. **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत -** (केवलं प्रश्नचतुष्टयम्) **(1x4 = 4)**

i ) इति + उक्तिः तत्कृतज्ञता।

ii) प्रियच्छात्राः अभिनन्दनं भवताम्।

iii) पितुरुपदेशेन असन्तुष्टः स द्वारकापुरीम् आगच्छत्।

iv) क्रोधाद्भवति सम्मोहः।

v) अहो विचित्रः + स्वप्नः मया दृष्टः।

6. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -** (केवलं प्रश्नचतुष्टयम्) **(1x4 = 4)**

i) सम्मोहात् स्मृतिविभ्रमः।

क) स्मृतौ विभ्रमः ख) स्मृतेः विभ्रमः ग ) स्मृतिः विभ्रमः घ) स्मृतये विभ्रमः

ii) एक: मेष: अहश्च निशा च तयो: समाहार: महानसं प्रविश्य भक्षयति।

क) अहर्निशम् ख) अहर्निशे ग ) अहनिशा: घ) अहर्निशी

iii) रे परभृत् ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्यु: पिका: ?

क) परेभ्य: भ्रियते इति ख) परेषां भ्रियते ग ) परै: भ्रियते इति घ) परं भ्रियते

iv) न पूर्व: कोऽपि कोशोऽयम्।

क) अपूर्व: ख) नपूर्व: ग ) अनपूर्व: घ) नापूर्व:

v) सः अपि तत् नेत्रं स्थानम् अनतिक्रम्य अस्थापयत्।

क) यथास्थिति: ख) यथास्थानम् ग ) यथाक्रमम् घ) यथाकालम्

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं लिखत –** (केवलं प्रश्नचतुष्टयम्) (1x4 = 4)

i) विपुला च अत्र वनसम्पदा।

(क) विपुला + टाप् (ख) विपुल + टाप् (ग) विपुल + ङीप् (घ) विपुल + आ

ii) विद्वांस एव चक्षुष्मन्तः प्रकीर्तिताः।

(क) चक्षुस् + मतुप् (ख) चक्षुः + मतुप् (ग) चक्षुर् + मतुप् (घ) चक्षुष्+मतुप्

iii) अस्मिन् अवसरे समाज + ठक् कार्यं क्रियते।

(क) सामाजिकम् (ख) सामाजिकः (ग) सामाजिकी (घ) सामाजिका

iv) राजहंस: हंस + ङीप् च विहरत:।

(क) हंसिनी (ख) हंसङी (ग) हंसा (घ) हंसी

v) किं ते महत्त्वम् ?

(क) महत् + त्वम् (ख) महत् + त्व (ग) महत् + तल् (घ) महत्त्व + त्व

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -** (केवलं प्रश्नत्रयम्) (1x3 = 3)

गीता – सीते ! किं त्वया ----------- पठ्यते ?

सीता – न , अहं तु गीतं ----------- |

मञ्जूषा - त्वया, पाठः, गायामि, अहम्

गीता – किं ----------- अद्य नगरं न गम्यते ?

सीता – न, ----------- तु अद्य नगरं न गच्छामि |

**9. कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत -** (केवलं प्रश्नत्रयम्) (1x3 = 3)

i) रमा (3:45) ----------- वादने गृहकार्यं करोति।

ii) तत: सा सायंकाले (5:30) ----------- वादने व्यायामं करोति।

iii) तदनन्तरं सा (6:15) ----------- वादने मन्दिरं गच्छति।

iv) (8:00) ----------- वादने आगत्य भोजनं करोति।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -** (केवलं प्रश्नचतुष्टयम्) (1x4 = 4)

i) त्वम् ----------- गच्छसि ?

मञ्जूषा - एव, अधुना, कुत्र, च, तर्हि

ii) स: तु चक्रम् --------------- अयाचत।

iii) यदि मां मित्रस्थाने परिगणयसि ---------------- भवान् साधुजनगर्हितम् इमं पन्थानं त्यजतु।

iv) ------------- तु वयम् एतानि स्थलानि द्रष्टुम् उत्सुका: स्म:।

v) स बाल्यात् एव वृद्धोपसेवी, विनयशील:, शास्त्रपारङ्गत: ----------------- आसीत्।

**11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत -** (केवलं प्रश्नत्रयम्) (1x3 = 3)

i) वयं विद्यालयं गच्छामि।

क) गच्छसि ख) गच्छाम: ग) गच्छत: घ) गच्छन्ति

ii) अहं पठने कुशलः असि।

क) त्वम् ख) वयम् ग) ते घ) अहम्

iii) एका बालक: पुस्तकं पठति।

क) एकस्मिन् ख) एक: ग) एकस्मात् घ) एकस्य

iv) ते श्व: ग्रामम् अगच्छन्।

क) गमिष्यामि ख) अगच्छत् ग) गच्छन्ति घ) गमिष्यन्ति

ii) एक: मेष: अहश्च निशा च तयो: समाहार: महानसं प्रविश्य भक्षयति।

क) अहर्निशम् ख) अहर्निशे ग ) अहनिशा: घ) अहर्निशी

iii) रे परभृत् ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्यु: पिका: ?

क) परेभ्य: भ्रियते इति ख) परेषां भ्रियते ग ) परै: भ्रियते इति घ) परं भ्रियते

iv) न पूर्व: कोऽपि कोशोऽयम्।

क) अपूर्व: ख) नपूर्व: ग ) अनपूर्व: घ) नापूर्व:

v) सः अपि तत् नेत्रं स्थानम् अनतिक्रम्य अस्थापयत्।

क) यथास्थिति: ख) यथास्थानम् ग ) यथाक्रमम् घ) यथाकालम्

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं लिखत –**

(केवलं प्रश्नचतुष्टयम्) (1x4 = 4)

i) विपुला च अत्र वनसम्पदा।

(क) विपुला + टाप् (ख) विपुल + टाप् (ग) विपुल + ङीप् (घ) विपुल + आ

ii) विद्वांस एव चक्षुष्मन्तः प्रकीर्तिताः।

(क) चक्षुस् + मतुप् (ख) चक्षुः + मतुप् (ग) चक्षुर् + मतुप् (घ) चक्षुष्+मन्त:

iii) अस्मिन् अवसरे समाज + ठक् कार्यं क्रियते।

(क) सामाजिकम् (ख) सामाजिकः (ग) सामाजिकी (घ) सामाजिका

iv) राजहंस: हंस + ङीप् च विहरत:।

(क) हंसिनी (ख) हंसङी (ग) हंसा (घ) हंसी

v) किं ते महत्त्वम् ?

(क) महत् + त्वम् (ख) महत् + त्व (ग) महत् + तल् (घ) महत्त्व + त्व

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -** (केवलं प्रश्नत्रयम्) (1x3 = 3)

गीता – सीते ! किं त्वया ----------- पठ्यते ?

सीता – न , अहं तु गीतं ----------- |

मञ्जूषा - | त्वया, पाठ:, गायामि, अहम् |

गीता – किं ----------- अद्य नगरं न गम्यते ?

सीता – न, ----------- तु अद्य नगरं न गच्छामि |

**9. कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत -** (केवलं प्रश्नत्रयम्) (1x3 = 3)

i) रमा (3:45) ----------- वादने गृहकार्यं करोति।

ii) तत: सा सायंकाले (5:30) ----------- वादने व्यायामं करोति।

iii) तदनन्तरं सा (6:15) ----------- वादने मन्दिरं गच्छति।

iv) (8:00) ----------- वादने आगत्य भोजनं करोति।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -** (केवलं प्रश्नचतुष्टयम्) (1x4 = 4)

i) त्वम् ----------- गच्छसि ?

मञ्जूषा - | एव, अधुना, कुत्र, च, तर्हि |

ii) स: तु चक्रम् --------------- अयाचत।

iii) यदि मां मित्रस्थाने परिगणयसि ---------------- भवान् साधुजनगर्हितम् इमं पन्थानं त्यजतु।

iv) ------------- तु वयम् एतानि स्थलानि द्रष्टुम् उत्सुका: स्म:।

v) स बाल्यात् एव वृद्धोपसेवी, विनयशील:, शास्त्रपारङ्गत: ----------------- आसीत्।

**11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत -** (केवलं प्रश्नत्रयम्) (1x3 = 3)

i) वयं विद्यालयं गच्छामि।

क) गच्छसि ख) गच्छाम: ग) गच्छत: घ) गच्छन्ति

ii) अहं पठने कुशलः असि।

क) त्वम् ख) वयम् ग) ते घ) अहम्

iii) एका बालक: पुस्तकं पठति।

क) एकस्मिन् ख) एक: ग) एकस्मात् घ) एकस्य

iv) ते श्व: ग्रामम् अगच्छन्।

क) गमिष्यामि ख) अगच्छत् ग) गच्छन्ति घ) गमिष्यन्ति

## 'ग' भाग: पठितम् अवबोधनम् (30 अङ्का:)

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

एवं बहुविधम् उपदेशं श्रुत्वा शान्तचित्तः सः कस्यचित् कृषकस्य शस्यक्षेत्रे हलकार्यं कर्तुं प्रारभत, श्रमेण च शनैः शनैः प्रभूतं धनम् अर्जितवान्। अथ पूर्वमित्रं दुष्टबुद्धिः प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा कदाचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थं सन्धि-खननसुयोगम् विलोकयन् स्थितः। तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः सम्भ्रान्तचित्तः स्वपत्नीं सम्बोध्य उवाच - अहो विचित्रः स्वप्नो मया दृष्टः। अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशःविद्यते इति। तच्छ्रुत्वा परद्रव्ये अनासक्ता सा न्यवेदयत् - नाथ ! विरम अस्माद् लोभात्।

**(I) एकपदेन उत्तरत -** (केवलं प्रश्नद्वयम्) (½× 2 = 1)

i) प्रच्छन्नभाग्येन कीदृशः स्वप्नः दृष्टः ?
ii) कुत्र सुवर्णपूरितः कलशः विद्यते ?
iii) कः हलकार्यं कर्तुं प्रारभत ?

**(II) पूर्णवाक्येन उत्तरत -** (केवलं प्रश्नद्वयम्) (1×2=2)

i) परद्रव्ये अनासक्ता सा किं न्यवेदयत् ?
ii) प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा दुष्टबुद्धिः किम् अकरोत् ?
iii) प्रच्छन्नभाग्यः सम्भ्रान्तचित्तः स्वपत्नीं सम्बोध्य किम् उवाच ?

**(III) निर्देशानुसारम् उत्तरत -** (केवलं प्रश्नद्वयम्) (1×2=2)

i) 'सुप्तोत्थितः प्रच्छन्नभाग्यः' इति अनयोः पदयोः किं विशेषणपदम् ?
ii) 'पिप्पलवृक्षमूले' इत्यस्य किं पर्यायपदं श्लोके प्रयुक्तम् ?
iii) 'विद्यते' इति क्रियापदस्य कर्तृपदम् अत्र किं प्रयुक्तम् ?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥
आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।
कालेन पादमादत्ते पादं सब्रह्मचारिभिः।।

**(I) एकपदेन उत्तरत -** (केवलं प्रश्नद्वयम्) (½× 2 = 1)

i) सरस्वत्याः कोशः कीदृशः मन्यते ?
ii) अयं कोशः कथं क्षयमायाति ?
iii) कः स्वमेधया पादम् आदत्ते ?

**(II) पूर्णवाक्येन उत्तरत -** (केवलं प्रश्नद्वयम्) (1×2=2)

i) शिष्यः कस्मात् पादम् आदत्ते ?
ii) भारत्याः कोशः कथं वर्धते ?
iii) शिष्यः काभिः पादम् आदत्ते ?

**(III) निर्देशानुसारम् उत्तरत -** (केवलं प्रश्नद्वयम्) (1×2=2)

i) अत्र 'कोशः' इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम् ?
ii) 'गुरुः' इत्यस्य किं विपर्ययपदं श्लोके प्रयुक्तम् ?
iii) 'अपूर्वः कोशः' इति अनयोः पदयोः विशेषणपदं किम् ?

**14. अधोलिखितं नाट्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

(स्थानम् – सरस्तीरम्। समयः - प्रभातवेला। तत्र राजहंसः हंसी च विहरतः। नेपथ्ये काकध्वनिः श्रूयते।)

राजहंसः - अये ! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुलीक्रियते ?

राजहंसी - भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दैः.............

काकः - (प्रविश्य, सक्रोधम्) आः ! किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे ! अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का - का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

**(I) एकपदेन उत्तरत-** (केवलं प्रश्नद्वयम्) (½×2=1)

i) नेपथ्ये का श्रूयते ? ii) सक्रोधं क: प्रविशति ?

iii) कर्तव्यपरायण: क: आसीत् ?

**(II) पूर्णवाक्येन उत्तरत -** (केवलं प्रश्नद्वयम्) (1×2=2)

i) काक: सक्रोधं किम् कथयति ? ii) के विहरत: ?

iii) काक: किं किं भक्षयति ?

**(III) निर्देशानुसारम् उत्तरत ।** (केवलं प्रश्नद्वयम्) (1×2=2)

i) 'अहं प्रभाते 'का - का' ध्वनिना सुप्तान् प्रबोधयामि । अत्र 'प्रबोधयामि' इति क्रियापदस्य कर्तृपदं किम् ?

ii) 'काक: कृष्ण:' अत्र विशेष्यपदं किम् ? iii) 'श्वेत:' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

15. **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-** (केवलं प्रश्नचतुष्टयम्) (1x5 = 5)

i) जनकेन सुताय शैशवे विद्याधनं दीयते ।

ii) अरुणाचलप्रदेशे पञ्चाशदधिका नद्य: प्रवहन्ति ।

iii) न जानाति भवान् द्रौणे: चपलां प्रकृतिम् ।

iv) प्राज्ञः कलहयुक्तं गृहं दूरतः परिवर्जयेत् ।

v) जगत्पते: एषा सृष्टि: रमणीया अस्ति ।

vi) भारत्या: कोश: अपूर्व: ।

16. **मञ्जूषात: समुचितपदानि चित्वा अधोलिखित - श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत -** (½×4=2)

| अनिच्छन् , चरति, प्रयुक्त:, नियोजित: |
|---|

अथ केन प्रयुक्तोऽयं पापं चरति पूरुष: ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजित: ॥

**अन्वय: -** वार्ष्णेय ! अथ केन i) -------- अयं पूरुष: ii) -------- अपि बलात् iii) --------इव पापं iv) -------- ।

**अथवा**

**मञ्जूषाया: सहायतया श्लोकस्य भावार्थं रिक्तस्थानानि पूरयित्वा पुन: लिखत -** (½×4=2)

| महात्मान:, कथयन्ति, सरलता , मनसि, |
|---|

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।
तदेवाहु: महात्मान: समत्वमिति तथ्यत: ।।

भावार्थ: - यथा i) ---------- सरलता भवति तथैव वाण्याम् अपि यदि ii) --------- भवेत् तदा एव iii) ---------- वास्तविकरूपेण तत् समत्वम् इति ---------- ।

17. **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत -** (केवलं प्रश्नचतुष्टयम्) (1x4 = 4)

i) मेध्यम् अमेध्यं सर्वमेव भक्षयति ।

क) अभक्षणीयम् ख) विशुद्धम् ग) मेधाविनम् घ) सकलम्

ii) राज्ञ: दानशीलताम् आकर्ण्य जना: तं देशम् आयान्ति स्म ।

क) मत्वा ख) श्रुत्वा ग) प्राप्य घ) कृत्वा

iii) यूथप: सर्वान् कपीन् आहूय रहसि अवदत् ।

क) मार्गे ख) एकान्ते ग) रहस्यम् घ) मनसि

iv) चञ्चलं हि मन: कृष्ण ! प्रमाथि बलवद्-दृढम् ।

क) गुणवत् ख) चिन्तनशीलम् ग) मथनशीलम् घ) प्रमोदे

v) स विवेक इति ईरित: ।

क) कथित: ख) दृष्ट: ग) चलित: घ) श्रुत:

18. **अधोलिखितां कथां मञ्जूषापदसहायतया पूरयित्वा लिखत -** (½×8=4)

**मञ्जूषा** –

| अर्धज्वलितकाष्ठेन, मेषः, अश्वशालां, मर्कटाः, राजवैद्यम्, नयन्ति स्म, अहनि ,वानरान् |
|---|

भूपतेः चन्द्रस्य पुत्राः वानरान् भोज्यपदार्थैः पुष्टिं i)------------- । राजगृहे बालवाहनयोग्यः ii)---------- जिह्वालोलुपतया महानसं प्रविश्य भोजनं खादति स्म । सूपकारैः नित्यं ताडितं मेषं दृष्ट्वा वानरयूथपःiii) ------------ राजभवनं त्यक्तुम् अकथयत् । रसनास्वादलुब्धाः मदोद्धताः iv) ------------- तद् राजभवनं त्यक्तुं न स्वीकृतवन्तः । अन्यस्मिन् v)----------- स मेषः सूपकारेण vi) ------------ ताडितः । ज्वलन् स मेषः vii) -------------प्रविष्टः । परिणामतः दग्धाः अश्वाः प्राणत्राणाय अधावन् । राजा viii) ------------- आहूय अश्वरक्षायै न्यवेदयत् । भयत्रस्ता कपयः गुरुजनोपदेशस्य अवधीरणातः पश्चात्तापं कृतवन्तः ।

दिल्ली - पब्लिक - स्कूल - भिलाईनगरम्

प्रतिदर्श - प्रश्नपत्रम्

कक्षा - दशमी

विषयः - संस्कृतम्

पूर्णाङ्काः - 80

समयः - होरात्रयम्

सामान्य-निर्देशाः

i - प्रश्नपत्रमिदं चतुर्षुभागेषु विभक्तम् अस्ति ।

ii. अस्मिन् प्रश्नपत्रे अष्टादश (18) प्रश्नाः सन्ति ।

iii - प्रश्नानाम् उत्तराणि संस्कृतभाषायामेव लेखनीयानि ।

'क' भागः - 10 अङ्काः

1 - अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

अस्माकं भारतवर्षः प्राकृतिक-सुषमायाः भण्डारः वर्तते। अत्र प्रकृतिः नटी प्रतिक्षणं नव्यं भव्यं च नाटयति। अत्र एकस्मिन् वर्षे षड् ऋतवः भवन्ति - वसन्तः, ग्रीष्मः, वर्षा, शरत्, शिशिरः हेमन्तश्च। एषु वसन्तस्यैव प्राधान्यं वर्तते। समागमे वसन्ते नातिशीतं नात्युष्णं भवति। साधुः एव ऋतुः ऋतुषु ऋतुराजः इति कथ्यते। अस्मिन् ऋतौ वसुन्धरा सुसज्जितं मनोरमं रूपं धारयति। सर्वमपि चारुतरं प्रतिभाति। अस्य तात्पर्यं एतत् अस्ति यत् कोऽपि ऋतुः महत्वहीनः नास्ति। प्रत्येकस्य स्वकीयं महत्वम् अस्ति। कवयः अपि एतेषां वर्णनं कृतवन्तः। महाकविः कालिदासेन ग्रीष्मस्य वर्णनं कृतः। यत्र वसन्तम् ऋतुराजं कथ्यते तत्रैव ग्रीष्मः ऋतुराज्ञी अपि कथ्यते। अस्मिन् ऋतौ आम्रवृक्षेषु कोकिलाः कूजन्ति। बालकाः च सरोवरे जलक्रीडां कुर्वन्ति ।

I - एकपदेन उत्तरत - (प्रश्नद्वयम्) 2×1 = 2

(i) भारतवर्षः कस्य भण्डारः वर्तते ?

(ii) कस्मिन् समागमे नातिशीतं नात्युष्णं भवति ?

(iii) अत्र एकस्मिन् वर्षे कति ऋतवः भवन्ति ?

II पूर्णवाक्येन उत्तरत - (प्रश्नद्वयम्) 2×2 = 4

(i) कः प्राकृतिकसुषमायाः भण्डारो वर्तते ?

(ii) कदा वसुन्धरा सुसज्जितं मनोरमं रूपं धारयति ?

(iii) ऋतौ कस्य प्राधान्यं वर्तते ?

III. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत । 1

IV. यथानिर्देशम् उत्तरत - (प्रश्नत्रयम्) 3×1=3

(i) 'एकस्मिन् वर्षे' अनयोः पदयोः विशेष्यपदं किम् ?

(ii) 'कूजन्ति' इति क्रियायाः कर्तृपदं किम् ?

(अ) बालाः (ब) कोकिलाः (स) वृक्षाः (द) ऋतवः

(iii) 'अतिशीतम्' अस्य विलोमपदं किम् ?

(अ) शीतम् (ब) अत्युष्णम् (स) वसन्तम् (द) शिशिरम्

(iv) 'बालकाः' इति कर्तृपदस्य क्रियापदं किम् ?

(अ) सरोवरे (ब) जलक्रीडाम् (स) कुर्वन्ति (द) च

'ख' खण्डः (रचनात्मकं कार्यम्) 15 अङ्काः

2- भवान् अनमोलः । मित्राय शलभाय स्वजन्मदिवसविषये लिखिते पत्रे मञ्जूषातः उचितानि पदानि चित्वा रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत - ½×10=5

परीक्षा भवनात्

(i) ______

दिनाङ्कः : ______

प्रियमित्र शलभ !

(ii) ______

यद्यपि (iii) ______ व्यस्ततया भवता मम जन्मदिवसोत्सवस्य आनन्दः न लब्धः तथापि आशासे यत् तस्य वर्णनं (iv) ______ भवान् अपि किमपि आनन्दम् अवश्यमेव (v) ______ । केककृन्तनस्य आधुनिकरीतिं विहाय यज्ञकथादिकस्य भारतीय-परम्परां अवलम्ब्य अयम् (vi) ______ मानितः । पुरोहितमहोदयेन आशीर्वचसा ममोपरि सर्वेषां (vii) ______ अक्षतैः शुभकामना प्रदत्ता । तत्पश्चात् सर्वैः (viii) ______ कृतम् । विस्तरेण तु अहं (ix) ______ एव बोधयिष्यामि ।

भवदीयं मित्रम्

मञ्जूषा - अनमोलः, मेरठतः, वार्षिकी-परीक्षायाः, मिलित्वा, पठित्वा, लप्स्यते, उत्सवः, आगन्तुकानाम्, जलपानम्

3. अधोदत्तचित्रस्य वर्णनं मञ्जूषायां प्रदत्तपदानां सहायतया पञ्चवाक्येषु कुरुत -

5×1=5



मञ्जूषा - अत्र, अस्मिन्, विशालम्, पुष्पाणि, विद्यालयः, बालः, भवनम्, कन्दुकम्, वृक्षाः, पक्षी, क्रीडादिवसः, धावन्ति, पारितोषिकोत्सवः, सन्ति, परस्परम्, चित्रे विरुकन्ति

4. रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पूरयत -

5×1=5

छात्रा - आचार्य! नमो नमः।

योगाचार्यः - शुभमस्तु। (i) ____________

छात्रा - मम नाम अनुप्रिया अस्ति। योगशिक्षां प्रति मम रुचिः अस्ति।

योगाचार्यः - शोभनम् (ii) ____________

छात्रा - अहं दशम्यां कक्षायां पठामि। आचार्य! (iii) ____________ ।

योगाचार्यः - योगः तु सर्वेभ्यः एव अतीव लाभकारः। विद्याध्ययने तु योगशिक्षा उपयोगिनी एव।

छात्रा - मया श्रुतं यद्, अधुना सम्पूर्ण- ~~विश्वे~~ योगदिवसः

योगाचार्यः -(iv) ____________________

छात्रा - मम अनुजः किञ्चित् अस्वस्थः वर्तते । किं तस्य कृते अपि योगः लाभकरः ?

योगाचार्यः - (v) ____________________

मञ्जूषा -

1. आम् स्वास्थ्याय योगः अनिवार्यः अतः तेन अपि योगः कर्तव्यः ।
(ii) भवत्याः नाम किम् ?
(iii) भवती कस्यां कक्षायां पठति ?
(iv) किं योगः छात्राणां कृते उपयोगी अस्ति ?
(v) सम्यक् श्रुतं त्वया, जूनमासस्य एकविंशतितमे दिवसे प्रतिवर्षम् अन्ताराष्ट्रिय योगदिवसः मन्यते

अथवा

अधोलिखितां कथां मञ्जूषायां प्रदत्तानां शब्दानां सहायतया पूरयित्वा पुनः लिखत -

½×10 = 5

एकदा (i) ______ वने एकः शृगालः (ii) ______ । स गह्वरे (iii) ______ अपतत् । यदा एका अजा गर्ते (iv) ______ तदा सा अपृच्छत् । त्वम् अत्र किं करोषि ? शृगालः अवदत् अत्र अस्मिन् गर्ते (v) ______ जलम् अस्ति । शीतलं मन्दं पवनं चापि अत्र वहति । (vi) ______ तु तस्यैव आनन्दम् अनुभवामि । त्वमपि अत्र आगच्छ । अजा तस्मिन् गर्ते कूर्दितवान् । तदैव शृगालस्य कुटिलता जागृता स धूर्तः शृगालः अजायाः पृष्ठं चर्वयित्वा गर्तात् बहिः (vii) ______ । समयेन तु अजायाः स्वामी आगतः (viii) ______ च अनयत् । मार्गे अजा अपश्यत् शृगालः एकस्य (ix) ______ तीरेण विद्धः कण्टके च अन्तिमं (x) ______ गणयति ।

मञ्जूषा -

श्वासम्, एकस्मिन्, गर्ते, आसीत्, अपश्यत्, अहम्, शीतलम्, आगतः, अजाम्, व्याधस्य

PTO

'ग' खण्डः

अनुप्रयुक्त व्याकरणम्

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत : (केवलं प्रश्नचतुष्टयम्) 4×1 = 4

(i) कर्मपुरे प्रच्छन्नभाग्यः नाम कश्चित् कुमारः अवसत् ।

(ii) पो + अनः स्तब्धः जातः ।

(iii) अदीयमानं धनं निधनैकनिष्ठम् ।

(iv) प्रसन्नः भूत्वा नृपः चक्षुर्द्वयम् अयच्छत् ।

(v) षट् + एते पाठकाः गुणाः ।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) ततः व्यासनारदौ प्रविशतः ।

(A) व्यासौ च नारदौ च

(B) व्यासे च नारदौ च

(C) व्यासः च नारदः च

(D) नारदः च व्यासः च

(ii) न पूर्वः कोशः विद्यते तव भारति !

(A) अपूर्वः (B) नपूर्वः (C) पूर्वः न (D) अनपूर्वः

(iii) मयूरः साट्टहासम् प्रविशति ।

(A) अट्टहासम् सह (B) अट्टहासेन सह (C) अट्टहसस्य सह (D) अट्टहासे सह

(iv) काकः सक्रोधम् प्रविशति ।

(A) क्रोधम् सह (B) क्रोधात् सह (C) क्रोधेन सह (D) क्रोधस्य सह

(v) सः बाल्यात् एव शास्त्रेषु पारङ्गतः आसीत् ।

(A) शास्त्रपारङ्गतः (B) शास्त्रपरङ्गतः (C) शास्त्रपारङ्गतः (D) पारङ्गतशास्त्रं

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् विकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) 4×1 = 4

(i) विपुल + टाप् च अत्र वन सम्पदा ।

(A) विपुल + आ (B) विपुल + टाप् (C) विपुला + टाप् (D) विपल + आ

(ii) अवक्र + तल् यथा चिन्त्ये तथा वाचि भवेत् यदि ।

(A) अवक्रत (B) अवक्रता (C) अवक्रिता (D) अवकरता

(iii) अस्मिन् अवसरे सेतुनिर्माणम् आदि समाज + ठक् कार्यं क्रियते ।

(A) समाजिकम् (B) सामाजिकम् (C) समाजिकेन (D) समाजिक

(iv) लोके विद्वांसः एव चक्षुष् + मतुप् प्रकीर्तिताः ।

(A) चक्षुष्वन्तः (B) चक्षुष्मन्तः (C) चक्षष्मन्तः (D) चक्षाष्मन्तः

(v) महात्मनः तदैव सम + त्व इति आहुः ।

(A) समत्व (B) समतम् (C) समत्वम् (D) त्वमसमम्

8. वार्त्तानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत : (केवलं प्रश्नत्रयम्) 3×1=3

पिता - भवान् किं लिखति ?

पुत्रः - ____ तु पाठाः लिख्यन्ते ।

पिता - भवान् ____ पाठान् लिखति ?

पुत्रः - अहम् इतिहासस्य पाठान् ____ ।

पिता - भवता तदनन्तरं किं क्रियते ?

पुत्रः - ____ कन्दुकेन क्रीडिष्यामि ।

मञ्जूषा - अहम्, मया, लिखामि, कान्

9. कालबोधकशब्दैः रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्) 3×1 = 3

(i) छात्रैः (5:00) ____ वादने पाठः कण्ठस्थः कर्तव्यः ।

(ii) तत्पश्चात् (6:45) ____ वादने प्रातराशं खादनीयम् ।

(iii) (7:15) ____ वादने छात्रैः विद्यालयः गन्तव्यः ।

(iv) तैः विद्यालयात् (1:30) ____ वादने गृहम् आगन्तव्यम् ।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) ____ विवादं त्यक्त्वा उद्यमः क्रियताम् ।

(ii) तयोः वार्तां श्रुत्वा सः झटिति —— क्षेत्रं गतः ।
(iii) न तावत् कलहेन समयं —— यापयेत ।
(iv) अवमानितं —— सर्वं पक्षिकुलं त्वया ।
(v) मनसः निग्रहं तयोः —— सुदुष्करम् ।

मञ्जूषा - | खलु , इव, वृथा, इदानीम् , एव |

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितं पदं चित्वा वाक्यानि पुनः लिखत - (केवलं प्रश्नत्रयम्) 3×1 = 3

(i) अहं श्वः विद्यालयं गच्छामि ।
(A) गच्छति (B) गमिष्यामि (C) गच्छसि (D) गच्छाव

(ii) सः बालिका पुस्तकं पठति ।
(A) सा (B) ताः (C) ते (D) तौ

(iii) त्वं सुखस्य कुपरिणामं न जानीथ ।
(A) वयम् (B) आवाम् (C) यूयम् (D) अहम्

(iv) अयं फलम् अतीव मधुरम् अस्ति ।

## 'घ' खण्डः (पठितावबोधनम्) 30 अङ्काः

12. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

कस्मिंश्चित् चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म।

I- एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1/2 × 2 = 1

(i) भूपतेः नाम किम् आसीत् ?
(ii) राजगृहे कीदृशं मेषयूथम् आसीत् ?

(iii) मेघः कुत्र प्रविश्य यत् पश्यति तत् भक्षयति ?

II - पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2

(i) सूपकाराः मेषं कैः ताडयन्ति स्म ?

(ii) राजपुत्राः वानरयूथं कथं पुष्टिं नयन्ति स्म ?

(iii) जिह्वालोलुपतया मेषः किं करोति स्म ?

III - निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1×2 = 2

(i) 'नयन्ति स्म' इति क्रियायाः कर्तृपदं किम् ?

(ii) 'शीघ्रं' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(iii) 'बालवाहनयोग्यं मेषयूथम्' अनयोः पदयोः विशेष्यपदं किम् ?

13. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत- 5

आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया ।
कालेन पादमादत्ते पादं सब्रह्मचारिभिः ॥

I - एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½×2 = 1

(i) कः स्वमेधया शिक्षां गृह्णाति ?

(ii) शिष्यः प्रथमं चतुर्थांशं कस्मात् आदत्ते ?

(iii) शिक्षायाः तृतीयं चतुर्थांशं केन आदत्ते ?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2 = 2

(i) शिष्यः आचार्यात् कियत् भागम् आदत्ते ?

(ii) शिष्यः कया द्वितीयं चतुर्थांशं गृह्णाति ?

(iii) शिष्यः कैः विद्यायाः चतुर्थं भागं गृह्णाति ?

III - निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2

(i) 'आदत्ते' इति क्रियायाः कर्तृपदं किम् ?

(ii) 'चतुर्थांशं' पदस्य अर्थे कः शब्दः आगतः ?

(iii) 'शिष्यः' अस्य पर्यायपदं श्लोके किम् अस्ति ?

14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-5

मयूरः - (प्रविश्य साट्टहासम्) सत्यं सत्यम् । अहमेव राष्ट्रपक्षी। को न जानाति तव ध्यानावस्थाम् ? मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य, क्रूरतया भक्षयसि । धिक् ...

अवमानितं खलु पक्षिकुलं त्वया।

काकः - रे सर्पभक्षक! नर्तनात् किम् अपरं जानासि?

मयूरः - श्रूयतां श्रूयताम्! मम नृत्यं तु प्रकृतेः आराधना। पश्य! चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम्। मम केकारवं श्रुत्वा कोकिलः अपि लज्जते। मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः।

I - एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½×2 = 1

(i) मयूरस्य नृत्यं कस्याः आराधना मन्यते?

(ii) कस्य केकारवं श्रुत्वा कोकिलः अपि लज्जते?

(iii) केषां सौन्दर्यम् अपूर्वम्?

II - पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2 = 2

(i) विधात्रा मयूरं कथं पक्षिराजः कृतः?

(ii) काकः मयूरं किं कथयति?

(iii) बकः मीनान् कथं भक्षयति?

III - निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1×2 = 2

(i) 'ईश्वरेण' अस्य पर्यायपदं नाट्यांशे किम् अस्ति?

(ii) 'वराकान् मीनान्' अनयोः पदयोः विशेषणपदं किम्?

(iii) 'लज्जते' इति क्रियायाः कर्तृपदं किम्?

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (पञ्चानाम्) 1×5 = 5

(i) पिता पुत्राय बाल्ये विद्याधनं यच्छति।

(ii) त्यागसमं सुखं नास्ति।

(iii) कामस्य नाशाय इन्द्रियाणि वशे करणीयानि।

(iv) शारदा सर्वदा अस्माकं समीपे वसेत्।

(v) अरुणाचले पञ्चाशदधिकाः नद्यः प्रवहन्ति।

(vi) आचार्यः पुत्रं सावधानम् अकरोत्।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत - ½×4 = 2

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं सः युक्तः स सुखी नरः॥

अन्वयः - यः शरीरविमोक्षणात् (i) ____ कामक्रोधोद्भवं (ii) ____
इह एव सोढुं शक्नोति सः (iii) ____ युक्तः सः (iv) ____
(भवति) ।

मञ्जूषा - | वेगम्, नरः, प्राक्, सुखी |

अथवा

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा तं पुनः लिखत -

$1/2 \times 4 = 2$

हंसश्वेतः बकश्वेतः को भेदः बकहंसयोः ।
नीरक्षीरविवेके तु हंसो हंसः बको बकः ॥

भावार्थः - हंसस्य वर्णः (i) ____ भवति, बकस्य अपि (ii) ____ श्वेतः भवति । उभयोः मध्ये भेदः कदा भवति ? (iii) ____ एव हंसः (iv) ____ भवति बकः च बकः भवति ।

मञ्जूषा - | हंसः, नीरक्षीरविवेके, श्वेतः, वर्णः |

17. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) $4 \times 1 = 4$

(i) आचार्यात् <u>पादम्</u> आदत्ते ।
(A) चरणम् (B) चतुर्थांशम् (C) श्लोकस्य पङ्क्तिम् (D) श्लोकम्

(ii) अलम् अलम् <u>मिथः</u> कलहेन ।
(A) मिथ्या (B) परस्परम् (C) स्वकीयम् (D) अन्यस्य

(iii) अन्यस्मिन् <u>अहनि</u> महानसं प्रविष्टः मेषः सूपकारेण ताडितः ।
(A) रात्रौ (B) मार्गे (C) दिवसे (D) प्रातः

(iv) यः इच्छत्यात्मनः <u>श्रेयः</u> प्रभूतानि सुखानि च ।
(A) श्रेष्ठः (B) कल्याणम् (C) सम्पत्तिम् (D) सखा

(v) आपदां <u>तरणिः</u> धैर्यम् ।
(A) नौका (B) सूर्यः (C) चन्द्रः (D) तरणम्

18. अधोलिखितां कथां मञ्जूषापदैः रिक्तस्थानानि पूरयित्वा पुनः लिखत - ½×8 = 4

प्रच्छन्नभाग्यः नामकः एकः कुमारः (i) ——— अवसत्। बाल्ये सः दुष्टबुद्धिनाम्ना (ii) ——— सह चौर्यकर्मणि संलग्नः अभवत्। मार्गे गच्छतः प्रच्छन्नभाग्यस्य (iii) ——— केनचित् बालवचसा प्रतिहतम् अभवत्। सः पापपथं त्यक्त्वा (iv) ——— अगच्छत्। पश्चात्तापेन दग्धमानसः सः सर्वं वृत्तान्तं (v) ——— निवेद्य सकरुणम् अक्रन्दत्। पत्न्याः परामर्शेन सः परिश्रमं कृत्वा शनैः शनैः प्रभूतं (vi) ——— अर्जितवान्। मित्रस्य धनागमवृत्तान्तं श्रुत्वा दुष्टबुद्धिः तस्यैव गृहे चौर्यार्थम् अगच्छत्। प्रच्छन्नभाग्यस्य स्वप्नवार्तां श्रुत्वा (vii) ——— क्षेत्रम् अगच्छत्। अश्वत्थमूलं खनित्वा (viii) ——— प्राप्नवत्।

मञ्जूषा -

| |
|---|
| सुवर्णकलशम्, झटिति, कर्मपुरनगरे, चौरेण, मनः, धनम्, गृहम्, भार्यायै |

दिल्ली पब्लिक स्कूल, भिलाईनगरम्
आदर्शप्रश्न पत्रम्
कक्षा - दशमी, विषय: - संस्कृतम्

पूर्णाङ्का: - 80.

निर्देशा: -

i) प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
ii) अस्मिन् प्रश्नपत्रे 18 (अष्टादश) प्रश्ना: सन्ति।
iii) प्रश्नानाम् उत्तराणि क्रमानुसारेण एव लेखनीयानि।

खण्ड: 'क' - अपठित-अवबोधनम् - 10 अङ्का:
खण्ड: - ख - रचनात्मकं कार्यम् - 15 अङ्का:
खण्ड: - ग - अनुप्रयुक्त व्याकरणम् - 25 अङ्का:
खण्ड: - घ - पठितावबोधनम् - 30 अङ्का:

खण्ड: - 'क' - अपठितांश- अवबोधनम् (10 अङ्का:)

1) अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

अस्माकं जीवने अनुशासनस्य अति-महत्त्वम् अस्ति। अनुशासनम् इति शब्द: 'अनु' उपसर्ग-पूर्वकं शासनम् शब्देन निर्मितम् अस्ति। अस्य अर्थ: अस्ति - शासनस्य अनुसरणम्। अत: नियमानां पालनं नियन्त्राणां स्वीकरणं वा अनुशासनं कथ्यते। जीवनस्य प्रत्येकस्मिन् क्षेत्रे कतिपयानां नियमानां पालनं आवश्यकं वर्तते। यथा प्रात: जागरणं, नियमित व्यायाम:, नियमेन क्रियमाणं कार्यं पूर्णसमर्पणं च अनुशासित-जीवनस्य अङ्गानि सन्ति। प्रकृत्या: सृष्ट्या: वा मूलेऽपि अनुशासनं दृश्यते। सूर्य:, चन्द्र:, पृथ्वी, ग्रहा:, नक्षत्राणि च सर्वाणि अनुशासने बद्धानि सन्ति। शरीरस्य आरोग्याय यथा सन्तुलितं भोजनम् अपेक्ष्यते, तथैव राष्ट्रस्य समाजस्य च उत्थानाय अनुशासनम् आवश्यकं भवति।

छात्राणां कृते अनुशासनस्य बहुमहत्त्वम् अस्ति। यदि छात्राः ध्यानेन पठन्ति, तर्हि भविष्ये जीवनस्य प्रत्येकस्मिन् क्षेत्रे साफल्यं प्राप्नुवन्ति।

(I) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1 × 2 = 02

(क) केषां पालनम् अनुशासनं कथ्यते ?

(ख) छात्राणां कृते कस्य बहुमहत्त्वम् अस्ति ?

(ग) ध्यानेन के पठन्ति ?

(II) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2 × 2 = 04

(i) कस्याः मूले अनुशासनं दृश्यते ?

(ii) अनुशासने के कानि च बद्धानि सन्ति ?

(iii) अनुशासनस्य कः अर्थोऽस्ति ?

III अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत - 01

IV - भाषिककार्यम् - (केवलं प्रश्नत्रयम्) 03

(i) "छात्राः ध्यानेन पठन्ति" इति वाक्ये कर्तृपदं किम् ?

(क) ध्यानेन (ख) छात्राः (ग) पठन्ति ? (घ) यदि

(ii) "प्रत्येकस्मिन् क्षेत्रे" अत्र विशेषणपदं किम् ?

(iii) 'अंशुः' इति पदस्य किं पर्यायपदम् अनुच्छेदे आगतम् ?

(क) चन्द्रः (ख) अर्थः (ग) सूर्यः (घ) प्रातः

(iv) 'असफलता' इति पदस्य विलोमपदं किं अस्ति ?

(क) साफल्यम् (ख) अनुसरणम् (ग) क्रियमाणम् (घ) जीवनम्

②

खण्डः - ख - रचनात्मककार्यम्

② भवती निवेदिता। भवत्याः सखी गरिमा, या गायन-प्रतियोगितायाम् प्रथमं स्थानं प्राप्तवती। मञ्जूषातः रिक्तस्थानानि पूरयित्वा तस्यै वर्धापनपत्रं लिखतु। ½ × 10 = 05

भिलाई नगरतः
दिनाङ्कः- - - - - -

प्रिय मित्र गरिमे!

सप्रेम (i) ________।

समाचारपत्रेण ज्ञातं यत् भवती राष्ट्रिय-गायन-प्रतियोगितायां (ii) ________ स्थानं प्राप्तवती। पठित्वा अहं अतीव (iii) ________ अनुभवामि। त्वया बाल्यकालात् एव (iv) ________ गृहीता, नित्यं च (v) ________ कृतः इति अहं (vi) ________। अद्य तव परिश्रमस्य विजयः अभवत्। सफलतायाः प्रथमं सोपानं त्वया (vii) ________। अस्मिन् अवसरे मम (viii) ________ स्वीकरोतु। भविष्ये अपि एवम् एव सफला भवेत् इयं कामना अस्ति। स्वपितृभ्याम् मम सादरं (ix) ________ निवेदयतु।

भवत्याः सखी
x ________

मञ्जूषापदानि -
(प्रसन्नतां, नमोनमः, संगीतशिक्षा, प्राप्तम्, प्रथमं, निवेदिता, वर्धापनं, प्रणामाः, जानामि, अभ्यासः)

③ चित्रं दृष्ट्वा प्रदत्तशब्दानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत - 1 × 5 = 05



मञ्जूषा :- (नौकाः, नाविकः, नद्याः, दृश्यम्, स्वच्छजलम्, जले, नौका विहारं, गृहाणि, वृक्षाः, विकसन्ति, भ्रमतः, पुष्पाणि, द्वौ जनौ, चालयति, नद्याःतटे, जनाः, बालिका, सन्ति,)

अथवा

मञ्जूषायाः सहायतया 'मम जननी' इति विषयम् अधिकृत्य संस्कृतभाषायां पञ्चवाक्यानि लिखत - 1×5 = 05

(शिक्षिका, गृहकार्येषु दक्षा, मम जननी, एकस्मिन् विद्यालये, विचारशीला, मातुः नाम, प्रभावशालिनी, सौम्यतायाः मूर्तिः, सामाजिकं कार्यम्)

(4) अधोलिखितानां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनः लिखत - ½×10 = 05

(उपाविशत्, मित्रता, खड्गेन, मक्षिका, छिन्ना, व्यजनेन, नासिकायामेव, वानरः, वारंवारम्, दूरम्)

पुरा एकस्य नृपस्य एकः प्रियः (i) ________ आसीत्। एकदा नृपः सुप्तः आसीत्। वानरः (ii) ________ तम् अवीजयत्। तदैव एका (iii) ________ नृपस्य नासिकायाम् (iv) ________ । यद्यपि वानरः (v) ________

व्यजनेन तां मक्षिकां निवारयति स्म तथापि सा पुनः-पुनः नृपस्य (vi) ——— उपविशति स्म। अन्ते सः मक्षिकां हन्तुं (vii) ——— प्रहारम् अकरोत्। मक्षिका तु उड्डीय (viii) ——— गता, किन्तु खड्गप्रहारेण नृपस्य नासिका (ix) ——— अभवत्। अतएव उच्यते "मूर्खजनैः सह (x) ——— नोचिता"।

<u>अथवा</u>

रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत- 1×5 = 05

माता :- पुत्रि! त्वम् अधुना किं करोषि?

पुत्री - माते! अहं संस्कृतस्य (i) ——— पठामि।

माता - त्वं संस्कृतव्याकरणं किमर्थं (ii) ——— ?

पुत्री - (iii) ——— पठित्वा न केवलम् अहं संस्कृतभाषायाः ज्ञाने (iv) ——— भविष्यामि अपितु अन्यभाषाज्ञाने अपि ~~[illegible]~~ निपुणा भविष्यामि।

माता - सत्यं कथयसि, संस्कृतभाषा तु अधापि ~~[illegible]~~ सङ्गणकस्य (computer) प्रयोगाय अपि (v) ——— भाषा अस्ति।

(संस्कृतव्याकरणं, सर्वोत्तमा, पठसि, व्याकरणम्, समर्था)

---

खण्डः - ग - <u>अनुप्रयुक्त-व्याकरणम्</u> (अङ्काः - 25)

(5) अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत - (प्रश्नचतुष्टयम्) 1×4 = 04

(क) अवक्रता यथा चित्ते तथा वाचि <u>भवेत्+यदि</u>।

(ख) <u>चञ्चलं</u> हि मनः कृष्ण।

P.T.O.

(ग) तस्मात् रक्षेत् सदाचारं प्राणेभ्यः + अपि विशेषतः।

(घ) प्रियच्छात्राः! भवतां स्वागतम् अस्ति।

(ङ) अहम् अत्र + एव प्राणायामं करिष्यामि।

(6) रेखाङ्कितपदानां समासं विग्रहं वा विकल्पेभ्यः चित्वा लिखत - केवलं प्रश्नचतुष्टयम्) 1 × 4 = 04

(क) वाक्पटु धैर्यवान् मन्त्री सभायाम् अपि अकातरः।

(i) न कातरः (ii) अन कातरः (iii) कातरं विना (iv) अपि कातरः

(ख) तवाङ्गगोम्पा इति प्रसिद्धः बौद्धधाम मठः अस्ति।

(i) बौद्धधाममठः (ii) बौद्मठः (iii) बौद्धमठः (iv) बुद्धमठः

(ग) नास्ति विद्यासमं चक्षुः।

(i) विद्यसमं (ii) विद्या समः (iii) विद्यासमं

(iv) विद्यासमेन।

(घ) यथासमयं सर्वेषां महत्त्वं भवति।

(i) समयं यथा (ii) समयम् अनतिक्रम्य (iii) समयम् अतिक्राम्य

(iv) यथासमयः।

(ङ) काकः च मयूरः च राष्ट्रपक्षी भवितुं इच्छतः स्म।

(i) काकमयूरौ (ii) मयूरकाकः (iii) काकमयूरः (iv) काकमयूरम्

(7) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा विकल्पेभ्यः चित्वा लिखत (प्रश्नचतुष्टयम्) 1 × 4 = 04

(क) भवतां सर्वेषां हृद + ठक् स्वागतम्।

(i) हार्दिकस्य (ii) हार्दिकम् (iii) हार्दिकः (iv) हृदिकम्

(ख) अवक्रता यथा चित्ते तथा वाचि भवेत् यदि।

(i) अवक्र + तल् (ii) अवक्र + ङीप् (iii) अवक्र + टाप् (iv) अवक्र + ठक्

(ग) बुद्धि + मतुप् पतिम् अवदत् - 'अलं चिन्तया'।

(i) बुद्धिमान् (ii) बुद्धिमती (iii) बुद्धिमत् (iv) बुद्धिमतुप्

(घ) तदेवाहुः महात्मानः समत्वम् इति तत्त्वतः।

(i) सम + तल् (ii) सम + ङीप् (iii) सम + त्व (iv) समा + त्वम्

(ङ) राजहंस + ङीप् अवदत् "एतत् कार्यं कुक्कुटोऽपि करोति"

(i) राजहंसः (ii) राजहंसम् (iii) राजहंसिन् (iv) राजहंसी

(8) वाच्यानुसारं उचितपदैः रिक्तस्थानपूर्तिं कुरुत -
(केवलं प्रश्नत्रयम्) 1 × 3 = 03

पुत्रः - जनक! अहं जन्तुशालां गन्तुम् ——— ।

जनकः - वत्स! अद्य अस्माभिः तत्र ———।

पुत्रः - वेगेन कः धावति?

जनकः - ——— वेगेन धाव्यते।

पुत्रः - मृगं कः हन्ति?

जनकः - चित्रकेण ——— हन्यते।

(गम्यते, मृगः, गच्छामि, चित्रकेण)

(9) कालबोधक शब्दैः संस्कृतप्रशिक्षणशिविरस्य समयसारिणीं
पूरयत - केवलं (प्रश्नत्रयम्) 1 × 3 = 03

(क) प्रातः 7:15 ——— वादने ईश-वन्दना।

(ख) प्रातः 7:45 ——— वादने अल्पाहारः भवति।

(ग) प्रातः 8:30 ——— वादने सम्भाषण-अभ्यासः चलति।

(घ) प्रातः 11.00 ——— वादने उच्चारण-संशोधनम्।

(10) उचितैः अव्ययपदैः अधोलिखित वाक्येषु रिक्तस्थानानि
पूरयत - केवलं प्रश्न चतुष्टयम्) 1 × 4 = 04

(क) मञ्चे पर्यटनाधिकारी, प्राचार्यः ——— उपविष्टौ।
(ख) विद्वांस ——— लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
(ग) ——— त्वं मम गदां धनुः चक्रं वा इच्छसि तर्हि तुभ्यं ददामि।
(घ) अश्वाः प्राणरक्षार्थं ——— अधावन्।
(ङ) ——— चन्द्रो नाम भूपतिः अभवत्।

(एव, इतस्ततः, च, पुरा, यदि)

(IV) अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नत्रयम्) 1 × 3 = 03

(क) अहं तु वनं गच्छति।
(i) गच्छामि (ii) गमामि (iii) गच्छसि (iv) अगच्छत्।
(ख) श्रीकृष्णः अर्जुनस्य सह प्राविशत्।
(i) अर्जुनः (ii) अर्जुनम् (iii) अर्जुनेन (iv) अर्जुनाय
~~(ग) अहो विचित्रं स्वप्नः मया दृष्टः~~
(ग) पिता यच्छति पुत्रं बाल्ये विद्याधनं महत्।
(i) पुत्रस्य (ii) पुत्राय (iii) पुत्रेण (iv) पुत्रेषु
(घ) छात्रः श्वः विद्यालयं गच्छति।
(i) गमिष्यामि (ii) गच्छसि (iii) गमिष्यति (iv) गच्छिष्यति।
(ङ) मार्गे पञ्चाः गजाः चलन्ति।
(i) पञ्च (ii) पञ्चं (iii) पञ्चस्य (iv) पञ्चानि।

12. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत -

दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत्। प्रच्छन्नभाग्यः तु समुपजातविवेकः स्वगृहं प्रतिनिवृत्तः। गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत् - 'आर्य! किं सर्वगतं कुशलं वर्तते? अयथाकालं समागतोऽसि? तदा धर्ममतिः प्रच्छन्नभाग्यः पश्चात्तापेन दग्धमानसः सर्वं वृत्तान्तं निवेद्य सकरुणम् उच्चैः अक्रन्दत्। बुद्धिमती सा अवदत् - 'अलं चिन्तया। आपदां तरणिः धैर्यम्। इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्।"

(i) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½ × 2 = 01

(i) धर्ममतिः कः आसीत्?

(ii) प्रच्छन्नभाग्यस्य सद्वचनानि कः तिरस्कृतवान्?

(iii) आपदां का धैर्यम्?

(ii) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1 × 2 = 02

(i) समागतं पतिं दृष्ट्वा भार्या किं अपृच्छत्?

(ii) कः ग्रामाभिमुखं प्राचलत्?

(iii) कीदृशः प्रच्छन्नभाग्यः उच्चैः अक्रन्दत्?

(iii) निर्देशानुसारम् उत्तरत (केवलं प्रश्नद्वयम्) 1 × 2 = 02

(i) पत्नी इति पदस्य कृते गद्यांशे कः शब्दः प्रयुक्तः?

(ii) "सर्वं वृत्तान्तं" अनयोः पदयोः विशेष्यपदं किम्?

(iii) 'अक्रन्दत्' इति क्रियापदस्य अनुच्छेदे कर्तृपदं किम्?

(13) अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत -

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

P.T.O.

(10)

(i) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ × 2 = 01

(i) अस्माकं प्रथमः धर्मः कः ?

(ii) प्राणेभ्योऽपि विशेषतः कः अस्ति ?

(iii) आचारः प्रथमः धर्मः इति केषां वचनम् ?

(ii) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1 × 2 = 02

(i) जनः जीवने कं रक्षेत् ?

(ii) विदुषां वचः किम् अस्ति ?

(iii) सदाचारं कथं रक्षेत् ?

(iii) निर्देशानुसारम् उत्तरत - 1 × 2 = 02

(i) तस्मात् रक्षेत् सदाचारम् अत्र क्रियापदं किम् ?

(ii) कुराचारम् इत्यस्य विपर्ययपदं किम् अस्ति ?

(iii) 'प्रथमः धर्मः' अनयोः पदयोः विशेषणपदं किम् ?

(14) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत-

बकः- (प्रविश्य, स्वपक्षौ अवधूय) कथं माम् अपि अधिक्षिपसि ? किं ते महत्त्वम् ? वर्षाऋतौ तु मानसं पलायसे। अहम् एव अत्र ह्रदे: अभिनन्दनं करोमि। आपत्काले सरांसि त्यक्त्वा दूरं व्रजसि। वस्तुतः अहमेव शीतले जले बहुकाल पर्यन्तम् अविचलं ध्यानमग्नः 'स्थितप्रज्ञः' इति तिष्ठामि। दुग्धधवलाः मे पक्षाः। न जाने कथं जनाः चित्रवर्णिनम् अहिभुजं मयूरं राजपक्षी इति मन्यते।

मयूरः - (प्रविश्य साट्टहासम्) सत्यं वदसि। अहमेव राजपक्षी। को न जानाति तव ध्यानावस्थाम्। मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्।

P.T.O.

(v) एकपदेन उत्तरत - केवलं प्रश्नद्वयम्  ½ × 2 = 01

(i) राजहंसः कदा मानसं ~~मान~~ पलायते ?

(ii) कः मीनान् क्रूरतया भक्षयति ?

(iii) शीतले जले बकः कथं तिष्ठति ?

(iv) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)  1 × 2 = 02

(i) जनाः कीदृशं मयूरं राष्ट्रपक्षी मन्यन्ते ?

(ii) बकः मीनान् कथं खादति ?

(iii) राजहंसः कानि त्यक्त्वा दूरं गच्छति ?

(iii) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्)  1 × 2 = 02

(i) 'दुग्धधवलाः पक्षाः' अनयोः पदयोः विशेष्यपदं किम् ?

(ii) 'सरोवरम्' अस्य पर्यायपदम् अनुच्छेदे किम् अस्ति ?

(iii) ~~मन्यन्ते~~ 'जनाः' इति कर्तृपदस्य क्रियापदं किम् ?

(15) रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः)  1 × 5 = 05

(क) पिता पुत्राय बाल्ये विद्याधनं यच्छति।

(ख) जलबिन्दुनिपातेन घटः पूर्यते।

(ग) ज्वलन् मेषः अश्वशालां प्रविशति।

(घ) धैर्यवान् लोके पराजयं न प्राप्नोति।

(ङ) अरुणाचले पञ्चाशत् अधिकाः नद्यः वहन्ति।

(च) कामः ज्ञानस्य नाशं करोति।

(16) मञ्जूषातः समुचितपदानि चित्वा श्लोकस्य अन्वयं रचयत -  ½ × 4 = 02

P.T.O.

यः सप्तराज्येषु विभासमानः,
तरङ्गिणी यत्र च लोहिताख्या।
'ईटा' हि यस्यास्ति पुरी प्रधाना,
सुस्वागतं भो! अरुणाचलेऽस्मिन्।

अन्वयः - यः सप्तराज्येषु ——— (अस्ति), यत्र ——— तरङ्गिणी यस्य च प्रधाना ——— ईटा अस्ति, भो अस्मिन् ——— स्वागतम् अस्ति।
(पुरी, विभासमानः, अरुणाचले, लोहिताख्या)

अथवा

मञ्जूषायाः सहाय्येन श्लोकस्य भावार्थं रिक्तस्थानेषु लिखत - ½ × 4 = 02

असंशयं महाबाहो! मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते।

भावार्थः - हे महाबाहो! अत्र संशयः नास्ति यत् एतत् ——— तु अति चञ्चलं अस्ति। इदं बहुकष्टेन ——— भवति, परन्तु यदि वयं पुनः पुनः ——— कुर्मः, विरक्ताः च भवामः, तदा निश्चितरूपेण एतत् वशीकर्तुं ———।
(नियन्त्रितं, शक्नुमः, मनः, अभ्यासम्)

17. अधोलिखितवाक्येषु रेखाङ्कितपदानां ~~प्रसङ्गानुसारं~~ प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्-) 1 × 4 = 04

(क) विषादं त्यक्त्वा उद्यमः क्रियताम्।
(i) परिश्रमः (ii) प्रयोगः (iii) प्रयत्नः (iv) सूर्यः

P.T.O.

(21) नास्ति विद्यासमं चक्षुः।

(i) मुखम् (ii) शिरम् (iii) नेत्रम् (iv) पादम्

(31) आपत्काले संराशि त्यक्त्वा दूरं व्रजसि।

(i) नदसि (ii) गच्छसि (iii) पश्यसि (iv) पठसि

(41) अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।

(i) भीम: (ii) अर्जुन: (iii) कृष्ण: (iv) युधिष्ठिर:

(8) स विवेक इति ईरित:।

(i) कथित: (ii) श्रुत: (iii) उचितम् (iv) दृष्ट:।

18. अधोलिखितां कथां प्रदत्तशब्दानां सहायतया पूरयत - ½ × 8 = 04

मार्गे (1) ________ वचनेन प्रतिहतान्तकरण: प्रच्छन्नभाग्य: अचिन्तयत् - "किम् इदम् (2) ________ माम् एव संकेतयति? कुमार्गम् आश्रितस्य मम (3) ________ इयं क्लेशपरम्परा अस्ति? अनेन (4) ________ मम नेत्रे समुन्मीलिते। अद्यत: इदं (5) ________ त्यजामि।" तत: स मित्रं (6) ________ अवदत् - यदि भवान् मां (7) ________ मन्यते, तर्हि श्रेष्ठजनै: निन्दितम् इदं कार्यं भवान् अपि (8) ________।

(वचनम्, बालकवचनेन, मित्रं, कीदृशी, उद्दण्डबालकस्य, पापपथं, त्यजतु, दुष्टबुद्धिम्)

समाप्तम्